# Shri Ramakrishna panchakam

# श्रीरामकृष्णपञ्चकम्

## Document Information

Text title : Shri Ramakrishna panchakam

File name : rAmakRRiShNapanchakam.itx

Category : deities_misc, gurudev, rAmakRiShNa, panchaka

Location : doc_deities_misc

Author : Brahmachari Medhachaitanya

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# श्रीरामकृष्णपञ्चकम्

विधीनां श्रौतानामनियमगते संहततया,
न सम्प्राप्याधारं क्वचिदपि सखेदं लयजुषाम् ।
इदानीन्त्वामेकं सहजविषयं संस्कृतमतिं
किमेतत् संश्रित्य प्रियमिव हितं जन्मसफलम् ॥ १॥

निषेधास्ते सर्वे विलसदभयाकुण्ठितधियो
विशेषान् पापांस्ताननृजुमनुजानत्र कलिजान् ।
समाश्रित्यामत्ताः प्रकटितजया धिक्कृतजना,
अहो रामं कृष्णं सचकितमेवेत्यातिविजिताः ॥ २॥

तितिक्षा त्यागोऽसौ शमदमसमाध्यभयताः,
क्षमा शान्तिर्भक्तिः सहचरतया ज्ञानमतिगम् ।
प्रसिद्धं वैराग्यं मणिललनयोः सत्यपरता,
तनौ दिव्यायां ते युगपदतिलोभात्किमवसन् ॥ ३॥

किमुन्मत्तो मूर्खस्तव गुणगरिम्नः स्तवमिमं
पिशाचार्तः कर्तुं सितशशिधृतौ बाल इव वा ।
क्षमार्होऽयं दासः सहजकृपया नाथ निरतो
विवेकानन्दानामपि दुरवगाह स्वरमण ॥ ४॥

त्वमेकोऽद्वैतस्त्वं त्वमपि सकलोनिष्कल इति,
त्वमाराध्यो देवः शरणमिह दीनस्य कृतधीः ।
प्रियस्त्वं सर्वेषां स्मरणमननैकाधिकरणम्
नमो भूयस्तुभ्यं सुकृतनिकराणां प्रतिकृते ॥ ५॥

इति ब्रह्मचारिमेधाचैतन्यविरचितं “श्रीरामकृष्णपञ्चकम्” सम्पूर्णम् ।

Proofread by Aruna Narayanan

*Shri Ramakrishna panchakam*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*